दीर्घायुरसि अग्नीदग्नीन्विहर। “अनन्त्यस्यापि प्रश्नाख्यानयोः” पा० अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः। प्रश्ने। अगमः३ पूर्वा३न् ग्रामा३न्। सर्वपदानामयम्। आख्याने अगमः३म् पूर्वा३न् ग्रामा३न्। “प्लुतावैच इदुतौ” पा० यत्र दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ ३ तिकायन !। औ ३ पगव। चतुर्मात्रावत्र ऐचौ सम्पद्यते। “एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ” पा० अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्द्धस्याकारः प्लुतः स्यादुत्तरस्य त्विदुतौ स्तः। प्रश्नान्ताभिपूजितविचार्य्यमाणप्रत्यभिवादयाज्यान्तेष्वेव। प्रश्नान्ते। अगमः३ पूर्वा३न् ग्रामा३न् अग्निभूत३इ। अभिपूजिते। भद्रं करोषि पट३उ। विचार्य्यमाणे। होतव्यन्दीक्षितस्य गृह३इ। प्रत्यभिवादे। आयुष्मानेधि अग्निभूत३इ। याज्यान्ते। स्तोमैर्विधेमाग्नय३इ। परिगणनं किम् विष्णुभूते३ घातयिष्यामि त्वाम्। अदूराद्धूत इति न वक्तव्यम्। पदान्तग्रहणन्तु कर्त्तव्यम्। इह मा भूत् भद्रं करोषि गौ३रिति। अप्रगृह्यस्य किम् शोभने माले३। “आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः। अग्ना३इ पत्नीव” सि० कौ०

**प्लुति** स्त्री प्लु–भावे क्तिन्। प्लवने उत्प्लुत्यगमने। प्लुतिश्च शशादीनामिव गतिः (क्वचिदपि) समन्तात् जलादेर्गतिश्च। त्रिमात्रतयोच्चारणे च।

**प्लुष** दाहे भ्वा०पर०सक० सेट्। प्लोषति अप्लोषीत्। पुप्लोष उदित् क्त्वा वेट्। प्लुषित्वा प्लुष्ट्वा।

**प्लुष** दाहे दिवा०पर०सक० सेट्। प्लुष्यति ऌदित् अप्लुषत्।

**प्लुष** स्नेहे पूर्त्तौ च सक० स्नेहे अक० क्र्या० पर० सेट्। प्लुष्णाति अप्लोषीत् पुप्लोष।

**प्लुषि** पु० प्लुष–बा० कि। वकतुल्यतुण्डयुक्ते १खगभेदे यजु० २४।२९ वेददीपः। २दाहके सर्पभेदे ऋ० १।६१।१भा०। ३अल्पपरिमाणपुत्तिकादेहे शत०ब्रा० १४।४।१।२४ भाष्ये दृश्यम्। [मदङ्कम्” भाग०

**प्लुष्ट** त्रि० प्लुष–क्त। दग्धे अमरः। “द्रोणयस्त्वविप्लुष्टमिदं

**प्लुस** दाहे विभागे च दिवा०पर०सक० सेट्। प्लुस्यति इरित् अप्लुसत् अप्लोसीत् पुप्लोस। [तैत्ति० ७।५।८।५

**प्लेङ्ख** पु० प्र+इङ्ख–घञ् वेदे रस्य लः। प्रेङ्खणे प्रकष्टकम्पने

**प्लेव** सेवने भ्वा०आत्म०सक०सेट्। प्लेवते अप्लेविष्ट। पिप्लेवे ऋदित् चङि न ह्रस्वः।

**प्लोत** न० प्र+वे–क्त संप्र०रस्य लः। सुश्रुतोक्ते शस्त्रकर्म्मोपकरणभेदे “अतोऽन्यतमं कर्म चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गजलौकालाबूजाम्बवौष्ठपिचुप्लोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजनशीतोष्णोदककटाहादीनि”। [दाहे न०

**प्लोष** पु० प्लुष–भावे घञ्। दाहे अमरः। भावे ल्युट्। प्लोषण

**प्सा** भक्षणे अदा०पर०सक० अनिट्। प्साति अप्सासीत्। पप्सौ। गतौ निघण्टुः।

**प्सा** स्त्री प्सा–भावे अङ्। भक्षणे त्रिका०।

**प्सात** त्रि० प्सा–कर्म्मणि क्त। भक्षिते अमरः।

**प्सान** न० प्सा–भावे ल्युट्। भोजने हेमच०।

**प्सु** पु० प्सा–बा कु। रूपे निघण्टुः।

**प्सुर** त्रि० प्सु+वा० अस्त्यर्थे र। रूपवति ऋ०१०।२६।३भाष्ये

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसंकलिते वाचस्पत्ये पकारादिशब्दार्थसङ्कलनम्।

पकारादिषु शब्देषु केचित् शब्दा न सङ्कलिता केषाञ्चिच्चार्थभेदा भ्रमान्नोक्तास्ते इतःपरं परिशिष्टे प्रदर्श्यन्ते।